बहवो हि षष्ठ्यर्थाः–[1]स्वस्वाम्यनन्तरसमीपसमूहविकारावयवाद्याः। तत्र[2] यावन्तः शब्दे सम्भवन्ति तेषु सर्वेषु[3] प्राप्तेषु नियमः क्रियते [4]'षष्ठी स्थानेयोगा' इति। [5]स्थाने योगोऽस्याः इति व्यधिकरणो बहुव्रीहिः। [6]अत एव निपातनाच्च[7] सप्तम्या अलुक्॥

## स्थानेऽन्तरतमः। (५०/३९)

स्थाने प्राप्यमाणाना[8]मन्तरतम[9]आदेशो भवति सदृशतमः[10]। कुतश्च शब्दस्या[11]न्तर्यम्? स्थानार्थगुणप्रमाणतः। स्थानतः–'अकः सवर्णे दीर्घः' (६.१.१०१/८५)। दण्डाग्रम्। यूपाग्रम्[12]। [13]द्वयोरकारयोः कण्ठ्य एव दीर्घ[14] आकारो भवति। अर्थतः-[15]वतण्डी चासौ युवतिश्च[16]वातण्ड्ययुवतिः।[17]पुंवद्भावेन (६.३.४२/७४६) अन्तरतमः पुंशब्दोऽतिदिश्यते। गुणतः–पाकः। त्यागः। रागः। 'चजोः कु घिण्यतोः' (७.३.५२/२८६३) इति चकारस्या[18]ल्पप्राणस्याघोषस्य[19] तादृश एव ककारो [20]भवति। [21]जकारस्य घोषवतोऽल्पप्राणस्य तादृश[22]एव गकारः[23]। [24]प्रमाणतः–अमुष्मै। अमूभ्याम्। 'अदसोऽसेर्दादु दो मः' (८.२.८०/४१९) इति[25] ह्रस्वस्य ह्रस्वः, दीर्घस्य दीर्घः[26]। स्थाने इति वर्तमाने पुनः स्थाने[27]ग्रहणं किम्[28]? यत्रानेकमान्तर्यं [29]सम्भवति तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात्[30]। चेता, स्तोता। प्रमाणतोऽकारो गुणः प्राप्तः, तत्र स्थानत[31] आन्तर्याद् [32]एकारौकारौ भवतः। [33]तमब्ग्रहणं किम्? वाग्घसति। [34]त्रिष्टुब्भसति। 'झयो होऽन्यतरस्याम्' (८.४.६२/११९) इति हकारस्य पूर्वसवर्णे क्रियमाणे 'सोष्मणः सोष्माणः' इति द्वितीयाः प्रसक्ताः, 'नादवतो नादवन्तः' इति तृतीयाः, [35]तमब्ग्रहणाद् ये सोष्माणो नादवन्तश्च ते[36] भवन्ति चतुर्थाः (म.भा. १.१२०)॥

## उरण् रपरः। (५१/७०)

उः[37] स्थाने अण् प्रसज्यमान एव रपरो [38]वेदितव्यः। [39]कर्ता (७.३.८४/२१६८)। हर्ता। किरति (७.१.१००/२३९०)। गिरति। द्वैमातुरः (४.१.११५/१११८)। त्रैमातुरः[40]। उः इति किम्? [41]खेयम् (३.१.१११/२८६०)। गेयम् (६.४.६५/२८४३)। अण्ग्रहणं[42] किम्? 'सुधातुरकङ् च' (४.१.९७./१०९७)–सौधातकिः॥

## अलोऽन्त्यस्य। (५२/४२)

षष्ठीनिर्दिष्टस्य य उच्यते आदेशः, सोऽन्त्यस्यालः स्थाने [43]वेदितव्यः। 'इद् गोण्याः' (१.२.५०/१७०३)–पञ्चगोणिः। दशगोणिः॥

---

1. स्वस्वामिसम्बन्ध अ. क. ड. फ. ग. ह. 2. तत्र नास्ति ग. 3. सर्वेषु नास्ति ड. फ. ह. 4. षष्ठी नास्ति ह. 5. स्थाने योगोऽस्याः इति नास्ति ई. ह. 6. अत एव नास्ति ग. फ. ह. 7. च नास्ति ड. 8. वर्णानाम् क.ड.ग.फ, स्थानेषु प्राप्यमाणानाम् ई. 9. एव इत्यधिकम् क. 10. सदृशतमः नास्ति अ. 11. आन्तरतम्यम् फ. ह. 12. खट्वाग्रं फ, क्षपाग्रं ब, क्षुराग्रं ग.ह. 13. कण्ठ्ययोः इत्यधिकम् अ.क.ड.फ.ह. 14. दीर्घः नास्ति ग, स्थानत भवत्याकारः ह. 15. वतण्डी चासौ युवतिश्च नास्ति फ. ह. 16. वातण्डीयुवतिः क, वतण्डीयुवतिः ह. 17. पुंवद्भावे अ. 18. अल्पप्राणत्वात् अ. 19. अघोषवतः ह. 20. स्यात् ग. 21. वाक्यमिदं नास्ति ई, जकारस्य नास्ति फ. 22. स्याद् गुणतः इत्यधिकम् ग. 23. भवति इत्यधिकम् ह. 24. प्रमाणम् ह. 25. उत्त्वमत्वे ह, ह्रस्वस्य ह्रस्वः दीर्घः ई. 26. प्रमाणतः इत्यधिकम् ग. 27. स्थानग्रहणं ह. ई. 28. किम् नास्ति ग. फ. ह. 29. सम्भवति नास्ति अ. ग. फ. ह. 30. इति इत्यधिकम् ह. 31. एव इत्यधिकम् ग. 32. एकारौ ग. 33. तमग्रहणं ब.फ.ग.ई. 34. त्र्युष्टुब् ग, नास्ति अ. क. 35. तमग्रहणम् ब.ग.फ. 36. ते नास्ति ह. 37. ऋवर्णस्य क.ग.ड. 38. भवति ग.फ.ह. 39. भर्ता ब.ह. 40. एतन्नास्ति अ. क. ई. 41. ई च खनः (३.१.१११/२८६०) इत्यधिकम् ग. फ. ह, गेयम् नास्ति ग. ह. न्या. पमं. 42. इति इत्यधिकम् ग. फ. 43. इति वेदितव्यम् फ, प्रत्येतव्यः ब. ई.